कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका।
शीतपाकी कुलिङ्गाची काकजिह्वोरुपत्रिका ॥
इर्व्वारुचपुषी चोभौ गुञ्जारकपुनर्नवे।
कशेरुका तु काश्मीरी विश्वशालूककेशरम् ॥ * ॥
शूकधान्यानि सर्व्वाणि शमीधान्यानि यानि च।
चीरं चौद्रं तथा शुक्रं मज्जा तैलं वसा घृतम् ॥
निकोचाभिषुकास्फोटं वातासामारुमालकम्।
एवमादीनि चान्यानि विज्ञेयो मधुरो गणः ॥
राजा सञ्चिनुयात् सर्व्वं पुरे निरवशेषतः।
दाड़िमाम्रातकाम्रांश्च तिन्तिड़ीकाम्लवेतसम् ॥
भव्यं कर्कन्धु लकुचं करमर्द्दकरूषकम्।
बीजपूरककाण्डीरं मालती राजबन्धुकम् ॥
कौटकद्वयपर्णानि द्वयोरम्लिकयोरपि।
पारेवतं नागरकं प्राचीनारुकमेव च ॥
कपित्थामलकी चुक्रं फलं दन्तशठस्य च।
जम्बीरं नवनीतञ्च सौवीरकतुषोदके ॥
सुरासञ्च मद्यानि मण्डतक्रदधीनि च।
शुक्तानि चैव सर्व्वाणि ज्ञेयान्यम्लगणं द्विजाः ॥
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
सैन्धवोद्भिदपाटेयपाक्यसामुद्ररोमकम्।
कुप्यसौवर्च्चलविटं बालकेयं यवाक्रयम् ॥
औषक्षारं कालभस्म विज्ञेयो लवणो गणः।
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्।
कुठेरकं समरिचं शिग्रुभल्लातसर्षपाः ॥
कुष्ठाजमोदा किणिही हिङ्गुमूलकधान्यकम्।
कारवी कुञ्चिकाजाज्यः सुमुखः कालमालिका ॥
फणिज्झकोऽथ लशुनं भूस्तृणं सुरसस्तथा।
कायस्था च वयःस्था च हरितालं मनःशिला ॥
अमृता च रुदन्ती च रोहिषं कुङ्कुमं तथा।
वचा एरण्डकाण्डीरं शल्लकी हपुषा तथा ॥
सर्व्वपित्तानि मूत्राणि प्रायो हरितकानि च।
सङ्गराणि च मूलानि षड्खारिविषाणि च ॥
फलानि चैव च तथा सूक्ष्मैला हिङ्गुपत्रिका।
एवमादीनि चान्यानि गणः कटुकसंज्ञकः।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम ! ॥ * ॥
मुस्तचन्दनह्रीवेरक्ततमालकदारवः।
हरिद्रामलकोशीरं रक्तमालकवस्तुकम् ॥
दूर्व्वापटोलकटुकादन्तित्वक्पत्रकच्छुराः।
किराततिक्तकं निम्बं विषा चातिविषा तथा ॥
तालीशपत्रं तगरं सप्तपर्णविकङ्कताः।
काकोदुम्बरकोदीच्यसुषव्यः किणिही तथा ॥
कटुग्रन्था रोहिणी मांसी पर्पटं मदयन्तिका।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम् ॥
दुष्पर्शा गुरुणी कामा श्यामाकं गन्धनाकुली।
चतुष्पर्णी व्याघ्रनखमम्बका चतुरङ्गुला ॥
रम्भा चैव कुथापुष्पी तारास्रोता हरेणुका।
वेत्राग्रो वेतसस्तुम्बी विषाणी लोहमञ्जनम् ॥
मालती करतिक्ताख्या विषाङ्गी जिङ्गिका तथा।
पर्प्पटश्च गुड़ूची च गणस्तिक्तकसंज्ञकः ॥
एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे।
अभयामलके चोभे तथैव च विभीतकम् ॥
प्रियङ्गुधातकीपुष्पं मोचलोध्रार्ज्जुनासनाः।
अनन्ताम्री सुरानङ्गा श्योनाकं कट्फलं तथा ॥
भूर्जपत्रं शिलोद्भेदं पाटलापत्रलोमकम्।
समङ्गा त्रिवृताम्लं कार्पासा गैरिकाञ्जनम् ॥
विद्रुमं समधूच्छिष्टं कुम्भीकाकुसुदोत्पलम्।
न्यग्रोधोदुम्बराश्वत्थकिंशुका शिंशपा शमी ॥
पियालपिलुका शालशिरीषं पद्मकन्तथा।
बिल्वोऽग्निमन्थः प्लक्षश्च श्यामाकयवकोद्रवम् ॥
राजादनं करीरञ्च धान्यकप्रियकौ तथा।
शाकोटाशोकवदराः कदम्बखदिरद्वयम् ॥
एषां पत्राणि साराणि मूलानि कुसुमानि च।
एवमादीनि चान्यानि कषायाख्यो गणो मतः ॥
प्रयत्नेन नृपश्रेष्ठ! राजा सञ्चिनुयात् पुरे।
कीटाश्च मारणे योग्या व्यङ्गतायान्तथैव च ॥
वातधूमाम्बुमार्गाणां दूषणानि तथैव च।
धार्य्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि भारत ! ॥
विषाणान्धारणं कार्य्यं प्रयत्नेन महीभुजा।
विचित्राश्च गदा धार्य्या विषप्रशमनास्तथा ॥
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्द्धनाः।
कलाविदश्च पुरुषाः पुरे धार्य्याः प्रयत्नतः ॥
भीतान् प्रमत्तान् कुपितान् तथैव च विमानितान्।
कुभृत्यान् पापशीलांश्च न राजा वासयेत् पुरे ॥

यन्त्रायुधाट्टालचयोपपन्नं
समग्रधान्यौषधिसंप्रयुक्तम्।
वणिग्जनैश्चान्वितमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥"

इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १६१ अध्यायः ॥ * ॥ पुरे वर्णनीयानि यथा,—

"पुरे हट्टप्रतोली च परिखातोरणध्वजाः।
प्रासादाध्वप्रपारामवापीवेश्याः सती त्वरी ॥"

इति कविकल्पलता ॥

अवशिष्टं नगरशब्दे द्रष्टव्यम् ॥

पुरः, पुं, (पिपर्त्तीति। पॄ + कः।) गुग्गुलुः। इत्यमरः ।२।४।३६॥ (अस्य पर्य्यायो यथा,—

"गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः।
कुम्भोलूखलकं क्लीवे महिषाक्षः पलङ्कषः ॥"
"अम्लं तीक्ष्णमजीर्णञ्च व्यवायं श्रममातपम्।
मद्यं रोषन्त्यजेत् सम्यग्गुणार्थी पुरसेवकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पीतभिण्टी। इति शब्दचन्द्रिका ॥

पुरः, [स्] व्य, (पूर्व्वस्मिन् पूर्व्वस्मात् पूर्व्वो वा एवं पूर्व्वस्याः पूर्व्वस्यामित्यादि। पूर्व्व + "पूर्व्वाधरावराणामसि पुरधवश्चैषाम्।" ५। ३। ३९। इति असि तद्योगेन पुर् इत्यादेशश्च।) अग्रतः। इत्यमरः। ३। ४। ७॥ (यथा, कुमारे।४।३।

"अयि जीवितनाथ! जीवसी-
त्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति चितौ
हरकोपानलभस्म केवलम् ॥")

प्राच्यां दिशि। प्रथमे काले। (यथा, अभिज्ञानशकुन्तलायाम्। ७ अङ्के।

"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं विधि-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥")

पुरार्थे। अतीते। इति तट्टीकायां भरतः ॥

पुरःसरः, त्रि, (पुरोऽग्रे सरति गच्छतीति। सृ + "पुरोऽग्रतोऽग्रेषु सर्त्तेः।" ३। २। ११८। इति टः।) अग्रगामी। इत्यमरः ।२।८।७२॥ (यथा, महाभारते। ४। १६। २२।

"यस्याः पुरःसरा ह्यासन् पृष्ठतश्चानुयायिनः।
साहमद्य सुदेष्णायाः पुरःपश्चाच्च गामिनी ॥")

अस्य पर्य्यायः अग्रसरशब्दे द्रष्टव्यः ॥

पुरञ्जनः, पुं, (पुरं देहक्षेत्रं जनयतीति। जनि + बाहुलकात् खः।) जीवः। यथा,—

"पुरुषं पुरञ्जनं विद्यात् यद्व्यनक्त्यात्मनः पुरम्।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"

इति श्रीभागवते। ४। २९। २ ॥

पुरञ्जनी, स्त्री, (पुरञ्जन + गौरादित्वात् ङीष्।) बुद्धिः। यथा,—

"न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ!।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥
राजन्! मदीयाः सर्व्वे ते मामाहुश्च पुरञ्जनीम् ॥"
"बुद्धिन्तु प्रमदां विद्यान्ममाहमिति यत् कृतम्।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽचिभिर्गुणान् ॥"

इति श्रीभागवते। ४ स्कन्धे। २५।२९ अध्यायौ ॥

पुरञ्जयः, पुं, (पुरं शत्रुपुरं जयतीति। जि + खच्।) सूर्य्यवंशीयराजविशेषः। तत्पर्य्यायः। काकुत्स्थः २। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ९। ६। १२।

"पितर्य्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम्।
शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः।
ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्म्मभिः ॥"

पूरुवंशीयः सृञ्जयपुत्त्रः। यथा, हरिवंशे। ३१। १८।

"सृञ्जयस्याभवत् पुत्त्रो वीरो राजा पुरञ्जयः।
जनमेजयो महाराज! पुरञ्जयसुतोऽभवत् ॥"

पुरं जयतीति। पुर + जि + खच्।) पुरजयकर्त्तरि, त्रि॥ (यथा, महाभारते। १। १०२। ४५।

"स्वान्येव तेऽपि राष्ट्राणि जग्मुः परपुरञ्जय! ॥")

पुरटं, क्ली, (पुरति अग्रे गच्छतीति। पुर + बाहुलकात् अटन्।) सुवर्णम्। यथा,—

"हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः ॥"

इति विदग्धमाधवः ॥

पुरणः, पुं, (पिपर्त्ति पूर्य्यते वेति। पॄ पालनादौ + "कॄपॄवृजिमन्दिनिधाञः क्युः।" उणा० २।८१। इति क्युः। उत्वं रपरत्वञ्च।) समुद्रः। इत्युणादिकोषः ॥